रं.पा.

॥ आथर्वणोपनिषत्खंडार्थप्रारंभः ॥

श्रीमद्धनुमद्भीमम‍ध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ अनंतगुणपूर्णायदोषदूरायविष्णवे । नमःश्री
प्राणनाथायभक्ताभीष्टप्रदायिने ॥ अधिकारिणामखिलक्लेशनिवृत्तिविशिष्टपरमानंदावाप्तयेब्रह्मविद्यांवक्तुकामो योहवाऽविदि
तार्षेत्यादिश्रुतेर्ऋषिदेवताच्छंदोज्ञानस्यावश्यकत्वाद्ययातदक्षरमधिगम्यतइत्याद्युक्त्यादेवताज्ञानस्याक्षरपरिगणनयातित्रिष्टुबा
दिच्छंदोज्ञानस्यचसुकरत्वादृषिपरंपरामेवाह । ब्रह्मेत्यादिना । ब्रह्माचतुर्मुखः देवानांशेषवींद्रादीनांप्रथमः देवेभ्यःप्राथ
मिकस्सन्विष्णोस्सकाशात्संबभूवजज्ञे । तस्यमहिमानमाह । विश्वस्येति । गोप्तारक्षकःकर्तृत्वाद्युक्तिस्तस्याप्तत्वद्योतनार्था । एत

हरिःॐ ॥ ब्रह्मादेवानांप्रथमःसंबभूवविश्वस्यकर्ताभुवनस्यगोप्ता । सब्रह्मविद्यांसर्वविद्याप्र
तिष्ठामथर्वायज्येष्ठपुत्रायप्राह ॥ १ ॥ अथर्वणेयांप्रवदेतब्रह्माअथर्वातांपुरोवाचांगिरेब्रह्मवि
द्यां । सभारद्वाजायसत्यवहायप्राहभारद्वाजोंगिरसेपरावरां ॥ २ ॥

दुक्तिप्राप्तस्वातंत्र्यभ्रमनिरासायविष्णुतस्संभवोक्तिर्भाष्ये । सब्रह्मा सर्वविद्याप्रतिष्ठांसर्वाविद्याःप्रतितिष्ठंतियस्यांतांयज्ज्ञाने
सर्वविद्याविदितफलाभवंतितादृशीं ब्रह्मविद्यां वेत्तिअनयेतिविद्यांब्रह्मप्रमितिजनकशब्दराशिं ज्येष्ठपुत्रायवैवस्वतमन्वंतरंप्रथ
मतोजातायाथर्वायअथर्वनामकाय । अकारांतत्वंच्छांदसं । प्राह ॥ १ ॥ प्रवदेतप्रावददित्यर्थः । व्यत्ययेनलङर्थेलिङ् । भास ॥ १ ॥
नोपसंभाषेत्यादिनात्मनेपदं । स्पष्टमवददित्यर्थः । तांब्रह्मविद्यां अथर्वांगिरेअंगिरनामकायमुनये पुरापूर्वं उवाच । सअंगि

रनामको भारद्वाजायभरद्वाजपुत्राय नाम्नासत्यवहाय प्राहतांब्रह्मविद्यामित्यनुषंगः । भारद्वाजःअंगिरसेअंगिरोनामकायतां
ब्रह्मविद्यांप्राहेत्यनुषंगः । ब्रह्मविद्यांविशिनष्टि । परावरामिति । पराचसावराचपरावरातांपरावरां । एकैवविद्याविवक्षाभेदे
नपरावराचभवति । साचऋगादिरूपेत्यग्रेव्यक्ता ॥ २ ॥ शौनकःशुनकपुत्रःमहाशालः प्रत्यब्दंयज्ञकृन्महाशालइत्युक्तः ।
प्रत्यब्दंयज्ञकृत्सम्यङ्महाशालःप्रकीर्तितइतिछांदोग्यभाष्योक्तेः विधिवद्विध्युक्तप्रकारेणोपसन्नःउपसत्तिंप्राप्तः अंगिरसंपप्र
च्छहेभगवोभगवन्पूज्यपादेतियावत् मतुवसोरुस्संबुद्धौछंदसीतिरुः सर्वमिदंकर्मदेवतादिकंमयाज्ञातंवर्तते । तज्ज्ञानंकस्मि

शौनकोहवैमहाशालोंगिरसंविधिवदुपसन्नःपप्रच्छ । कस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातं
भवतीति ॥३॥ तस्मैसहोवाच । द्वेविद्येवेदितव्येइतिहस्मयद्ब्रह्मविदोवदंति । पराचैवापराच ॥४॥

न्ज्ञातेसफलंभवति यज्ज्ञानार्थसन्मोक्षाख्यफलवद्भवतितन्मेब्रूहीतिपप्रच्छेतियोज्यं । हवाइतिनिपातःप्रसिध्यर्थकः ॥ ३ ॥
कर्मदेवतादिज्ञानंतदनुष्ठानादिनाब्रह्मज्ञानार्थसन्मोक्षाख्यफलवद्भवतीतितदेतत्सत्यंमंत्रेष्वित्यादिनाविवक्षुरुपोद्घातपूर्वंब्रह्म
स्वरूपंतावद्वदामीतिभावेनोत्तरमुक्तवानित्याहवेदपुरुषः । तस्मैशौनकायसोंगिराउवाचेति । हेतिहर्षे । उपोद्घातमाह ।
द्वेविद्येइति । पूर्वत्रेवात्रापिविद्याशब्दःकरणसाधनः । विद्यावित्तिजनकंशास्त्रंद्वेद्विविधमित्यर्थः । उपाधिद्वैविध्याभिप्रा
येणद्विवचनोक्तिः । इतिब्रह्मविदोवदंतिस्महेतिप्रसिद्धमित्यर्थः । तथाचसूत्रं । अन्यार्थंतुजैमिनिःप्रश्नव्याख्यानाभ्याम‍ि

ति । कथमित्यतआह । पराचैवापराचेति । परममुख्यार्थबोधकत्वोपाधिनापरैवसतीविद्याअपराअमुख्यार्थबोधकत्वोपाधिनाअपराचेत्युच्यते । नवस्तुतोव्यक्तिभेदोस्तीत्येवकारप्रयोगः ॥ ४ ॥ अपरविद्यैवोपाधिभेदेनपरविद्येतिभावेनप्रस्तावपूर्वमपरविद्यामाह । तत्रापरेति । उपाधिभेदेनभिन्नतयानिर्दिष्टयोर्मध्यइत्यर्थः । वर्णानांस्थानप्रयत्नादिनिरूपकंशास्त्रंशिक्षा । प्रसिद्धप्रयोगबोधिनोबौधायनापस्तंबाश्वलायनादिग्रंथाःकल्पः । सिद्धरूपप्रयोगोयैःकर्मणामनुगम्यते । तेकल्पालक्षणार्थानिसूत्राणीतिप्रचक्षतइतितंत्रवार्तिकोक्तेः । शब्दानुशासनपरंव्याकरणं । शब्दनिर्वचनपरंनिरुक्तं । गायत्र्युष्णिगादि

तत्रापरा । ऋग्वेदोयजुर्वेदःसामवेदोथर्ववेदःशिक्षाकल्पोव्याकरणंनिरुक्तंछंदोज्योतिषमिति । अथपरा । ययातदक्षरमधिगम्यते ॥ ५ ॥ यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रंतदपाणिपादंनित्यंविभुंसर्वगतंसुसूक्ष्मं । तदव्ययंयद्भूतयोनिंपरिपश्यंतिधीराः ॥ ६ ॥

छंदसांलक्षणनिरूपकंछंदः । कालनिर्णयपरंशास्त्रंज्योतिषं । एतदेवऋगादिशास्त्रमक्षराधिगतिहेतुत्वोपाधिनापरविद्येतिभावेनाह । अथपरेति । अवसरप्राप्तापरविद्यानिरूप्यतइत्यर्थः । यदद्रेश्यत्वादिगुणकंतदक्षरं । ययाविद्ययावित्तिजनकऋगादिशास्त्रेणाधिगम्यतेसाऽक्षरज्ञप्तिहेतुत्वोपाधिनापरविद्येत्युच्यतइत्यर्थः । तदुक्तं । ऋगाद्याअपराविद्याइत्यादि । यथैकमेवचकर्मसकामत्वनिष्कामत्वोपाधिभ्यांप्रवृत्तंनिवृत्तमितिचोच्यतेतथेतिभावः ॥ ५ ॥ कीदृशंतदक्षरमित्यतस्तन्महिमानमा

ह । यत्तदिति । यदक्षरमद्रेश्यंदृष्ट्युपलक्षितबाह्येंद्रियाविषयं(षयः)अग्राह्यंमनसोप्यविषयं(षयः) । साकल्येनेतिवा । अयो ग्यैरितिवायोज्यं । यद्वाद्दश्यादन्यदद्दश्यं । ग्राह्यादन्यदग्राह्यमित्यर्थः । नविद्यतेगोत्रंवर्णंवायस्यतदगोत्रंअवर्णं अचक्षुःश्रोत्रमित्यादेःप्राकृतचक्षुरादिशून्यमित्यर्थः । नित्यंदेहतोपिनाशरहितं विभुंसमर्थं सर्वगतंसर्वव्यापि । सर्वगतत्वेप्रतिहतिःस्यादित्यतआह । सुसूक्ष्मं अत्यंताप्रतिघं । सूक्ष्मंतुतदर्हत्वादित्युक्तेः । ततूत्वयापृष्टमक्षरमितिपूर्वश्रुततत्पदस्यान्वयः । अद्रेश्यमित्युक्तिर्नसर्वथेतिभावेनाक्षरस्यगुणांतरमाह । तदव्ययमित्यादिना । यदक्षरंभूतानांप्राणिनांयोनिंकारणं धीराज्ञा

यथोर्णनाभिःसृजतेगृह्णतेचयथापृथिव्यामोषधयःसंभवंति । यथासतःपुरुषात्केशलोमानितथाक्षरात्संभवतीहविश्वं ॥ ७ ॥

निनःपरिपश्यंति अव्ययंशश्वदेकप्रकारभूतंतत्प्रागुक्तमक्षरमित्यर्थः । तथाचसूत्रं । अद्दश्यत्वादिगुणकोधर्मोक्तेरिति ॥६॥ यद्भूतयोनिमित्युक्तभूतकारणत्वंसंहर्तृत्वस्योपलक्षणमित्युपेत्यतदुभयप्रकारंदृष्टांतपूर्वकंव्यनक्ति । यथेति । ऊर्णनाभिर्जंतुविशेषस्स्वोपभुक्तवस्तूनितंत्वात्मनास्वोदरेपरिणतानिसृजतेबहिर्निष्कासयति । गृह्णतेगृह्णातिच । तंत्वाद्याकारतयाबहिर्निष्कासितंपुनरंतस्स्वोदरेगृह्णाति । तथाविश्वंलयेनिगीर्णंसत्अक्षराद्बहिर्देशेसंभवतीत्यर्थः । नतुविश्वात्मनापरिणममानत्वं नवातदात्मनाविवर्तत्वंचभूतयोनित्वमित्यर्थः । एतच्चोपलक्षणं । ऊर्णनाभिनातंतुराशिरिवसंह्रियतेचेत्यपिध्येयं । नानाविधसृष्टेर्वैषम्यादिदोषःकिंने

त्यतउक्तं । यथापृथिव्यामिति । यथापृथिवीशाल्यादिनानाबीजान्यपेक्ष्यनानाविधांकुरान्जनयति तथाजीवानांनानाविधकर्माण्यनुसृत्यनानाविधजीवान्सृजतीत्यर्थः । तथाचसूत्रं । वैषम्यनैर्घृण्येनसापेक्षत्वादिति । ननुअक्षरस्यविश्वसृष्ट्यादिनाफलसत्वेऽपूर्णताप्राप्तिः । तदसत्वेप्रेक्षावतस्तत्रप्रवृत्त्ययोगइत्यतउक्तं । यथासतइति । यथासतश्चेतनाधिष्ठितात्पुरुषाद्देहात्केशलोमान्यनायासेनभवंतितथाक्षरादनायासेनविश्वंसंभवतीत्यर्थः । अत्यायाससाध्येहिफलापेक्षा । अनायाससाध्येंऽगुलिचालनादौलोकेप्रेक्षावतामपिनफलापेक्षास्तीतिभावः । शिरोरुहाःकेशाःदेहजानिलोमानीतिविवेकः ॥ ७ ॥ यथापृ

तपसाचीयतेब्रह्मततोन्नमभिजायते । अन्नात्प्राणोमनःसत्यंलोकाःकर्मसुचामृतं ॥ ८ ॥ यस्सर्वज्ञःसर्वविद्यस्यज्ञानमयंतपः । तस्मादेतद्ब्रह्मनामरूपमन्नंचजायते ॥ ९ ॥ १ ॥

थिव्यामितिदृष्टांतोक्त्याप्राप्तपरिणामशंकांनिरस्यन्नक्षराद्विश्वसंभवक्रमंव्यनक्ति । तपसेति । अक्षराख्यंब्रह्मतपसाज्ञानेनचीयतेसंबध्यते । ब्रह्मविश्वसृजानीतिव्यचारयदितियावत् । ज्ञानरूपविचारवतोनपरिणामितेतिभावः । ततोविचारानंतरमितिविचारितवतोब्रह्मणइतिवा । अत्रान्नादिपदैर्जडंतदभिमानिदेवताचग्राह्या । लोकाजायंतइत्यनुषंगः । तदनंतरंकर्मजायतइतिशेषः । जातेषुकर्मसुनिमित्तभूतेषुअमृतंस्वर्गादिफलंजायतइत्यनुषंगः ॥ ८ ॥ तपसाचीयतइत्युक्त्याप्राग्ज्ञानंविनेतिप्राप्तशंकांनिरस्यंस्तपस्स्वरूपोक्तिपूर्वंप्रथमतस्सृष्टंचाह । यस्सर्वज्ञइत्यादिना । सर्वंजानातीतिसर्वज्ञः सर्वंवेत्तीतिसर्ववित् ।

॥ ३ ॥

ज्ञानवेदनयोस्सामान्यविशेषत्वेनापौनरुक्त्यं सर्वंविंदतेलभतइतिवासर्ववित् । विद्लृलाभइतिधातोःक्विप् । आप्तकामइत्यर्थः । हेगतुर्भमिदंद्वयं । सर्वज्ञत्वादाप्तकामत्वाद्यस्यतपोज्ञानमयंज्ञानात्मकं नालोचनात्मकं । नापिसंतापात्मकमिति । अज्ञोह्यालोचयति । अनाप्तकामस्तुतप्यति नित्यसिद्धसर्वविषयकमपिज्ञानंसिसृक्षारूपविशेषात्मनाकालविशेषेव्यज्यतइतितपसाचीयतइति सोकामयतेति तदैक्षतेति सईक्षांचक्रे तपस्तप्त्वाइत्यादिरूपेणश्रुतिषूच्यतइतिभावः । तस्मात्सर्वज्ञात्ब्रह्मणः नामरूपशब्दितशब्दप्रपंचार्थप्रपंचाभिमानितयाऽभेदोपचारेणनामरूपमन्नमित्युक्तंएतत्ब्रह्मचतुर्मुखाख्यंजायतइत्यर्थः ॥ ९ ॥

तदेतत्सत्यं । मंत्रेषुकर्माणिकवयोयान्यपश्यंस्तानित्रेतायांबहुधासंततानि । तान्याचरथनियतंसत्यकामाएषवःपंथाःसुकृतस्यलोके ॥ १ ॥

इतिप्रथमःखंडः ॥ १ ॥ कर्मदेवतादिज्ञानंयज्ज्ञानार्थंसदनल्पस्थिरफलवद्भवतितन्मेब्रूहीतिपृष्टवंतंशौनकंप्रतिअंगिराब्रह्मज्ञानार्थंसत्तादृशफलवद्भवतीतिभावेनब्रह्मस्वरूपंलेशेननिरूप्यइदानींयज्ज्ञानार्थंसदित्युक्तंतज्ज्ञानार्थत्वप्रकारमाह । तदेतत्सत्यमित्यादिना । तदेतत्परविद्याविषयतयाऽदृश्यत्वादिगुणकतयोक्तमक्षरंसत्यमपराधीनस्वरूपंसर्वसत्यताप्रदंचेत्यर्थः । कवयोज्ञानिनो मंत्रेषुयानिकर्माणि समाधौमनसाअपश्यन् तानित्रेतायांत्रेतायुगे बहुधासंततानि कृतयुगइवविष्णवेकविषयकाणिनासन् किंतु त्रेतादौतदशक्त्याहिधर्मोन्यस्संप्रवर्ततइतिपृथक्पृथक्चत्रेतायांयजंतेदेवतागणानितिचस्मृत्या

कृतयुगइवविष्ण्वेकनिष्ठतांविनानानाप्रकारेणतत्तद्देवतोद्देशेनकृत्वांतेविष्णावर्पयंतीतिबहुधाप्रवर्तितान्यासन्नित्यर्थः । सत्य
कामास्सत्याख्यभगवज्ज्ञानकामास्संतोयूयं तानिकर्माणिनियतंयथाभवतितथाऽऽचरथानुतिष्ठत । तथाहि । कर्मदेवता
दिज्ञानमुत्क्रमिष्यतएवंभावादित्यौडलोमिरित्यादिसूत्रोक्तदिशा तदनुष्ठानेनांतःकरणशुद्धिद्वारा ब्रह्मज्ञानहेतुश्रवणाद्यं
गंसब्रह्मज्ञानंजनयित्वानंतफलवद्भवति । अपरममुख्यवृत्त्याकर्मदेवतादिस्वरूपप्रतिपादकमपिऋगादिकंपरममुख्यवृत्त्याक्ष
रबोधकत्वेपरविद्यैवभवतीतिभावेनाह । एषवइति । एषःभगवज्ज्ञानोद्देश्यकःकर्माचारोवोयुष्माकंसुकृतस्यलोकेलोकस्यपं

**यदालेलायतेह्यर्चिःसमिद्धेहव्यवाहने। तदाज्यभागावंतरेणाहुतीःप्रतिपादयेत् ॥ २ ॥ यस्या
ग्निहोत्रमदर्शपूर्णमासमनाग्रयणमतिथिवर्जितंच । अहुतमवैश्वदेवमविधिनाहुतमासप्तमांस्त
स्यलोकान्हिनस्ति ॥ ३ ॥**

थामार्गइत्यर्थः । आचरथेतिबहुवचनोक्त्याप्रष्टाशौनकउपलक्षणमितिसूचितं ॥ १ ॥ कर्माचारप्रकारमाह । यदेत्यादिना ।
लेलायतेपरिवर्तते । अर्चिर्ज्वाला । समिद्धे । इन्धीदीप्तौ । सम्यक्दीप्यमानइत्यर्थः। आज्यभागावंतरेणआज्यभागयोर्मध्ये ।
आहुतीःप्रधानहोमान् प्रतिपादयेत्कुर्यात् । तदाएषकर्माचारस्सुकृतस्यपंथाइतियोजना । आज्यभागाख्यहोमौपार्श्वयोः ॥ ४ ॥
कृत्वामध्येहोमाःकार्याइत्यर्थः ॥ २ ॥ अग्नौक्रियमाणकर्मणइतिकर्तव्यतांविपक्षेऽनर्थकथनेनाह । यस्येति । यस्यपुरुषस्याग्नि

होत्रंदर्शपौर्णमासाग्रयणाख्येष्टित्रयानुष्ठानरहितमहुतंकालेहुतंनभवति । अवैश्वदेवंवैश्वदेवकर्मरहितं अविधिनाहुतंचत स्यतत्कर्म आसप्तमान्भूलोकमारभ्यसप्तमभूतसत्यलोकपर्यंतान्लोकान् भुवर्लोकमारभ्यसप्तमभूतवैकुंठलोकपर्यंतानि तिवा हिनस्ति । हिसिहिंसायां नाशयति । ऊर्ध्वलोकास्तस्यनभवंतीत्यर्थः । अतोदर्शपौर्णमासादिकमाहिताग्निनाका लेकालेकार्यमितिभावः ॥ ३ ॥ कुत्रहोतव्यमित्यपेक्षायांयदालेलायतइत्युक्तमधिकरणंविवृणोति । कालीति । विश्वरुचीच

कालीकरालीचमनोजवाचसुलोहितायाचसुधूम्रवर्णा । स्फुलिंगिनीविश्वरुचीचदेवीलेलायमा नाइतिसप्तजिह्वाः । एतेषुयश्चरतेभ्राजमानेषुयथाकालंचाहुतयोह्याददायन् ॥ ४ ॥ तन्नयंत्येताः सूर्यस्यरश्मयोयत्रदेवानांपतिरेकोधिवासः । एह्येहीतितमाहुतयःसुवर्चसःसूर्यस्यरश्मिभिर्य जमानंवहंति । प्रियांवाचमभिवदंत्योर्चयंत्यएषवःपुण्यःसुकृतोब्रह्मलोकः ॥ ५ ॥

देवीत्येका । भ्राजमानेषुदीप्यमानासुएतेषुएतासुजिह्वासुव्यत्ययात् । यथाकालमाहुतयःआहुतीःहूयमानहवींषि आ ददायन् आददानो यश्चरतेकर्मकुरुते । यद्वाचरतइत्यस्यविवरणं यथाकालंकालमनतिक्रम्यआहुतयःआहुतीःआद दायन् आददानःकुर्वन्निनितियावत् ॥ ४ ॥ यथाकालंसत्यज्ञानकामनयोक्तस्थानेषुहोतुःफलमाह । तमिति । एताएतेप्रसिद्धाः सूर्यस्यरश्मयःरश्मिषुस्थितादेवाःदेवानांपतिरेकोमुख्यःअधिवासोधिवसंत्यत्रेत्यधिवासोमुख्याश्रयो यत्रतिष्ठतितत्रतंनयंती

ति । नयनप्रकारमेवाह । येह्येहीति । आहुतयःआहूयमानाःस्वीकृतहविर्भागाइतियावत् । सुवर्चसःशोभनवर्चस्कादेवाः स्वाधिष्ठानभूतैस्सूर्यस्यरश्मिभिर्यजमानंवहंति । कथंएह्येहिवःपुण्यःपुण्यसाध्यःतस्यविवरणंसुकृतःब्रह्मलोकःपरब्रह्मलोकइ तिप्रियांवाचमभिवदंत्योऽभिवदंतःअर्चयंत्यःपूजयंतःवहंतीति ॥ ५ ॥ सत्यविषयत्वेनकृतकर्मणामक्षयफलमुक्त्वातदविषय त्वेनकृतकर्मणामनिष्टफलमाह । प्लवाइति । एतेभगवदविषयत्वेनानुष्ठिताः यज्ञरूपायज्ञस्यरूपमिवरूपंयेषांते विध्युक्तय ज्ञवदवभासमानाइतियावत् । अदृढाःप्लवाःलुप्तोपमानं यथाऽदृढप्लवेनमहानद्यादिकंतरन्नापदमाप्नोतितथैवंविधयज्ञैरापद

प्लवाह्येतेअदृढायज्ञरूपाअष्टादशोक्तमवरंयेषुकर्म । एतच्छ्रेयोयेभिनंदंतिमूढाजरामृत्युंतेपुनरे वापियंति ॥ ६॥ अविद्यायामंतरेवेष्ठयमानाःस्वयंधीराःपंडितंमन्यमानाः । जंघन्यमानाःपरियं तिमूढाअंधेनैवनीयमानायथांधाः ॥ ७ ॥

मेवाप्नोतिनश्रेयइति । तदेवाह । अष्टादशेति येषुयज्ञेषुअष्टादशानांपुरुषाणामुक्तमष्टादशोक्तं । भगवदविषयत्वहेतुनाऽव रमपकृष्टं । एतत्कर्मश्रेयःश्रेयस्साधनंमत्वायेमूढाअभिनंदंतिमोदंतेतेजरामृत्युं द्वंद्वैकवद्भावः । पुनरेवापियंति प्राप्नुवंति । पूर्वजरामृत्युमतामपिपुनःपुनःतत्प्राप्तिरेवभवति नकदापितन्निवृत्तिरितिभावः । अष्टादशपुरुषास्तु षोडशर्त्विजःयजमा नएकस्तन्निरीक्षकस्सभ्यएकइतिध्येयं ॥ ६ ॥ तेषांभगवदविषयत्वेनानुष्ठानेकिंबीजमित्यतआह । अविद्यायामिति । अंतरे

मध्येवेष्ठ्यमानाःपरितोबध्यमानाः । अत्यंतमविद्यातिरोहितत्वज्ञानाइत्यर्थः । स्वयंधीराःस्वात्मोत्प्रेक्षितप्रज्ञावंतः । अपं डितास्संतोपिपंडितमात्मानंमन्यमानाः । जंघन्यमाना हनहिंसागत्योःवक्रगतयः । अंधेननीयमानाअंधायथाभिन्नमार्गाएव मित्यर्थः ॥ ७ ॥ अविद्यावेष्टनंचनैकप्रकारमित्याह । अविद्यायामिति । बालाःप्रज्ञाहीनाः । कुतस्तेषामविद्यावेष्टनेनभगव त्प्रज्ञाहीनतेत्यतआह । यत्कर्मिणइति । यद्यस्मात्स्वर्गादिक्षयिष्णुफलेरागान्निमित्तात्कर्मिणःकर्मानुष्ठातारः । तेनकारणेननप्रवे दयंतिसम्यङ्ज्ञानंतिभगवंतं । स्वार्थेणिच् । सर्वेभ्योराजादिवत्किंचिदुत्तमत्वेनवासर्वसमत्वेनहीनत्वेनवाजानंतीतिप्रशब्दा

अविद्यायांबहुधावर्तमानाःस्वयंकृतार्थाइत्यभिमन्यंतिबालाः । यत्कर्मिणोनप्रवेदयंतिरागात्ते नातुराःक्षीणलोकाश्च्यवंते ॥ ८ ॥ इष्टापूर्तंमन्यमानावरिष्ठंनान्यच्छ्रेयोवेदयंतेप्रमूढाः । नाक स्यपृष्ठेसुकृतेतेनुभूत्वाइमंलोकंहीनतरंवाविशंति ॥ ९ ॥

र्थः । तेनहेतुनाआतुराःव्यग्रचित्तास्संतःक्षीणलोकाभवंतः च्यवंतेलोकच्युताभवंतीति ॥ ८ ॥ एतदेवफलमुक्तानुवादपूर्वंव्य नक्ति । इष्टापूर्तमिति । इष्टंचपूर्तंइष्टापूर्तं । द्वंद्वैकवद्भावः । अन्येभ्योपिदृश्यतइतिदीर्घः । इष्टंयजनं पूर्तमन्नदानादि । व रिष्ठंपरमश्रेयस्साधनंमन्यमानाःअन्यद्भगवल्लक्षणं श्रेयःप्रशस्तंवस्तु नवेदयंते नसम्यग्जानंतीत्यर्थः । तेभगवतःकिंचि दुत्तमत्वज्ञानपूर्वकंकर्मानुष्ठातारःसुकृतेसुकृतसाध्ये नाकस्यस्वर्गस्यपृष्ठे विस्तीर्णस्थलविशेषेऽनुभूत्वाकामाननुभूय इमं

लोकंभूलोकं मानुषभावमितियावत् । विशंतिप्राप्नुवंति । तेह्हरेःसमत्वहीनत्वज्ञानपूर्वकर्मकृतस्तु हीनतरंलोकं अंधंतमो विशंति । वाशब्दोव्यवस्थितविकल्पार्थः । तदुक्तं । देवेभ्यउत्तमंविष्णुंराजवद्यस्तुमन्यते । याजीसमानुषंयातिसाम्यहीन त्वचित्तमइति । तथाचोक्तंगीतातात्पर्ये । येनजानंतितिंविष्णुंयाथातथ्येनसंशयात् । जिज्ञासवश्चनितरांश्रद्धावंतःसुसाधवः । निर्णेतृणामभावेनकेवलंज्ञानवर्जिताः । तेयाज्ञिकाःस्वर्गभोगक्षयेयांतिमनुष्यतामिति । तथा येतुभागवताचार्यैस्सम्यग्यज्ञा दिकुर्वते । बहिर्मुखाभगवतिनिवृत्तास्सर्वकर्मणा । दक्षिणातर्पितानांतेआचार्याणांतुतेजसा । यांतिस्वर्गंततःक्षिप्रंतमोंधंप्राप्नु

तपःश्रद्धेयेभ्युपवसंत्यरण्येशांताविद्वांसोभैक्षचर्यांचरंतः । सूर्यद्वारेणतेविरजाःप्रयांतियत्रामृतः सपुरुषोह्यव्ययात्मा ॥ १० ॥

वंतिचेति ॥ ९ ॥ एवंसत्यज्ञानकामनयाकर्माण्याचरथेत्युक्तौकुत्रकथमित्याशंकायां यदेत्यादिमंत्रपंचकेनकर्मानुष्ठानस्थलमि तिकर्तव्यतांफलंचोक्त्वाप्लवाइत्यादिनामंत्रचतुष्टयेनोक्तवैपरीत्येनकर्मानुष्ठानेनर्थंचोक्त्वाधुनातान्याचरथसत्यकामाइत्यत्रक र्मदेवताज्ञानंतदनुष्ठानेनांतःकरणशुद्धिद्वाराज्ञानहेतुश्रवणाद्यंगंसद्ब्रह्मज्ञानमुत्पाद्यपरमपुमर्थायभवतीतियदुक्तं। तत्रसर्वथाऽव धानेनभाव्यमितिभावेनकर्माचारादेरुक्तरीत्याब्रह्मज्ञानार्थत्वंफलोक्त्योपसंहरति । तपःश्रद्धेइति। येभगवज्ज्ञानकामाःअरण्ये पुण्यदेशेस्थित्वातपःकृच्छ्रचांद्रायणादिरूपं। श्रवणमननालोचनरूपंवा। श्रद्धाऽऽस्तिक्यादिबुद्धिपूर्वकंयागादिकं। अभ्युपवसं

ति। आचरंतइतिशेषः। शांताभगवन्निष्ठावंतः। तेतपआदिनापूर्वोक्तप्रनाड्याविद्वांसःभगवज्ज्ञानिनोभूत्वायावत्प्रारब्धंदेहरक्ष णार्थंभैक्षचर्याभैक्षंकर्मचरंतःकुर्वंतःसूर्यद्वारेणसूर्यमंडलंप्राप्यतद्वारेणविरजाःविगतप्रारब्धकर्माणः तेजसिसूर्येसंपन्नःपाप्मना विनिर्मुक्तइतिश्रुत्यंतरोक्तेः आदेहंकर्मचाचरेदितिस्मृतेश्च। प्रयांतिप्रकर्षेणयांति । कुत्रेत्यतआह। यत्रामृतइति। अमृतः देहतोप्यविनाशीपुरुषःपूर्णषड्गुणःसप्रसिद्धोऽव्ययात्माशश्वदेकप्रकारःस्वामीवर्तते । तत्रप्रयांतीत्यर्थः ॥ १० ॥ एवंक र्मादिज्ञानंउत्क्रमिष्यतएवंभावादित्यौडलोमिरितिसूत्रोक्तदिशाप्रागुक्तप्रनाड्याब्रह्मज्ञानार्थंसत्परमपुमर्थहेतुःकर्मादिबोधकऋ

परीक्ष्यलोकान्कर्मचितान्ब्राह्मणोनिर्वेदमायान्नास्त्यकृतःकृतेन। तद्विज्ञानार्थंसगुरुमेवाभिगच्छे
त्समित्पाणिःश्रोत्रियंब्रह्मनिष्ठं ॥ ११ ॥

गादिविद्याचतथापरविद्याभवतीत्युक्तं । इदानींतुप्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यइतिसूत्रोक्तदिशाकाम्यकर्मतत्फलादौवैराग्यज ननद्वाराब्रह्मज्ञानसंपादनेच्छाजननेनब्रह्मज्ञानार्थंभवत्परमपुरुषार्थहेतुर्भवतीतितद्बोधकऋगादिविद्याप्यल्पास्थिरफलादिबोध नेनतत्राधिकारिणोवैराग्यजननद्वारानित्यानल्पफलकब्रह्मज्ञानकामोत्पादनेनब्रह्मज्ञानोपयोगिनीतिपरविद्याचभवतीतिभावे नाह । परीक्ष्येति। लोकान्विष्णुलोकेतरान् कर्मचितान्काम्यकर्मोपादितान् परीक्ष्यासारानित्यतयाविचार्य ब्राह्मणो ब्रह्माणनरूपब्रह्मज्ञानयोग्यः निर्वेदंकाम्यकर्मणितत्फलेचवैराग्यमायात्प्राप्नुयात् । यतोऽकृतोमोक्षःकृतेनकर्मणानास्तित

तस्मात्सचमोक्षादितरत्रनिर्विण्णोविज्ञानार्थं मोक्षफलकब्रह्मज्ञानार्थं गुरुमेवाभिगच्छेत् । गुरुमुपगंतारंचविशिनष्टि । समित्पाणिरिति । श्रोत्रियंछंदोध्येतारं ब्रह्मनिष्ठंभगवद्भक्तंगुरुमित्यन्वयः ॥ ११ ॥ गुरूपसत्तिंकुर्यादित्युक्त्वांगिराःकिमकरोदित्य तःशौनकायतत्वमुपदिदेशेत्याहवेदपुरुषः । तस्माइत्यादिना । उपसन्नायोपसत्तिंप्राप्ताय सम्यक्प्रशांतचित्तायविषयेष्वलंबुद्धिमते विरक्तायेतियावत् शमान्वितायभगवन्निष्ठायुक्ताय तस्मैशौनकाय सविद्वानंगिराः येनययाविद्ययाव्यत्ययात् । येनऋगादिशास्त्रेणेतिवा । सत्यमनन्याधीनस्वरूपंपुरुषमक्षरंवेदजानाति । तामृगादिशास्त्ररूपांब्रह्मविद्यांतत्वतो

तस्मैसविद्वानुपसन्नायसम्यक्प्रशांतचित्तायशमान्विताय।येनाक्षरंपुरुषंवेदसत्यंप्रोवाचतांतत्त्वतोब्रह्मविद्यां ॥ १२ ॥ २ ॥ तदेतत्सत्यं । यथासुदीप्तात्पावकाद्विष्फुलिंगाःसहस्रशःप्रभवंते सरूपाः । तथाक्षराद्विविधाःसोम्यभावाःप्रजायंतेतत्रचैवापियंति ॥ १ ॥

याथातथ्येनप्रोवाचेति । कर्मदेवतादिबोधकतयाशौनकेनावगतामृगादिविद्यांपरममुख्यवृत्तिमहातात्पर्याभ्यांब्रह्मज्ञप्तिहेतुत्वेनपरविद्यायथाभवतितथाव्याचख्याविति भावः । अतएवतत्वतइत्युक्तिः ॥ १२ ॥ इतिद्वितीयःखंडः ॥ २ ॥ ऋगादिशास्त्रस्यपरविद्यात्वापादकोमुख्योर्थःकः । यदर्थतयाऋगादिशास्त्रंब्रह्मविद्यात्वेनप्रोवाचेत्यतऋगादिशास्त्रमुख्यार्थोविश्वस्रष्टृत्वादिगुणविशिष्टोहरिरितिभावेनाह । तदेतदिति । वक्ष्यमाणंप्रमेयंसत्यंनमिथ्येत्यर्थः । विष्फुलिंगाःअग्निकणाः ।

प्रभवंतेप्रभवंति । सरूपाःप्रकाशेनसदृशाः विविधाःदेवदानवमानवादिभेदेननानाविधाःभावाःपदार्थाः सोम्यसोमपानार्हेतिशौनकस्यसंबोधनं । तत्रैवचाक्षरेअपियंतिप्रलयेतदुदरेलीयंते । अक्षरात्संभवतीहविश्वमितिप्रागुक्तस्यप्रपंचनादपौनरुक्त्यं ॥ १ ॥ अक्षरस्यसृष्ट्युपयुक्तगुणान्वदन् जगतइवनतस्यजन्मादीत्याह । दिव्यइति । दिव्योत्यद्भुतः । अमूर्तोनियतपरिच्छिन्नपरिमाणरहितः । किंतुबाह्योभ्यंतरश्च । अप्राणोह्यमनाइतिषोडशकलाराहित्यमुच्यते । शुभ्रःशुद्धः । अक्षराज्जड

दिव्योह्यमूर्तःपुरुषःसबाह्याभ्यंतरोह्यजः । अप्राणोह्यमनाःशुभ्रोह्यक्षरात्परतःपरः ॥ २ ॥ एतस्माज्जायतेप्राणोमनस्सर्वेंद्रियाणिच । खंवायुर्ज्योतिरापःपृथिवीविश्वस्यधारिणी ॥ ३ ॥ अग्निर्मूर्धाचक्षुर्षीचंद्रसूर्यौदिशःश्रोत्रेवाग्विवृताश्चवेदाः । वायुःप्राणोहृदयंविश्वमस्यपद्भ्यांपृथिवीह्येषसर्वभूतांतरात्मा । तस्मादग्निःसमिधोयस्यसूर्यःसोमात्पर्जन्यओषधयःपृथिव्यां ॥ ४ ॥

प्रकृतेः । परतःश्रीतत्वात् । परउत्तमः ॥ २ ॥ एतस्मात्पराक्षरात्प्राणोमुख्यवायुः । विश्वस्यधारिणीपृथिवीत्यन्वयः अत्रजडतदभिमानिनामुभयेषांग्रहणं ॥ ३ ॥ एतस्माज्जायतेप्राणइत्यादिनासामान्यतउक्तं तत्किंकस्मादंगाज्जातमित्यतआह । अग्निर्मूर्धेति । अस्यप्रकृताक्षरस्यभगवतोमूर्धाअग्निः । अत्तृत्वनिमित्तेनाग्निनामाग्निजनकश्च । अग्न्याख्यमूर्धजत्वादग्नेरग्निनाम । कार्यकारणयोर्गोभिःश्रीणीतमत्सरमित्यादाविवाभेदोपचारेणायंनिर्देशः । एवमुत्तरत्रापि चक्षुषीचंद्रसूर्यौआह्लादक

(र)त्वादिहेतुनाचंद्रसूर्यनामकेचंद्रसूर्यजनकेच। श्रोत्रेदिशःदिशंत्यभीष्टमितिदिङ्नामकेदिशांजनकेच । वाक्भगवतोवाक् । विवृतवेदनामिकाविवृतशब्दितविस्तीर्णवेदजनिका । विवृताअभिव्यक्तावा । भगवतःप्राणोवायुःवायुनामावायुजनकः विश्वमितिकाचिद्देवता । हृदयंविश्वनामकंविश्वजनकंच । पद्भ्यांपृथिवीत्यंतेश्रवणात्पूर्वत्रापिजन्यजनकभावेनअग्निर्मूर्धेत्यादिनिर्देशइतिज्ञायते । हिशब्दःपद्भ्यांभूमिरित्यादिश्रुत्यंतरप्रसिद्धिद्योतकः । नकेवलंसृष्टिसंहारकर्तानियमनकर्ताचेत्याह । एषसर्वभूतांतरात्मा । अंतस्थित्वाआदानादिकर्तृत्वादंतरात्मा । तस्मादग्निस्समिधश्चपृथिव्यांजायंतइतिशेषः । यश्चसूर्यःतस्मा

पुमान्रेतःसिंचतियोषितायांबह्वीःप्रजाःपुरुषात्संप्रसूताः ॥ ५ ॥ तस्मादृचःसामयजूंषिदीक्षाय
ज्ञाश्चसर्वेक्रतवोदक्षिणाश्च । संवत्सरश्चयजमानश्चलोकाःसोमोयत्रपवतेयत्रसूर्यः ॥ ६ ॥

त्सूर्यात्सोमाच्चपर्जन्यःवृष्टिःपर्जन्यात्पृथिव्यामोषधयश्चजायंतइत्यर्थः ॥ ४ ॥ एवमंगेभ्यउत्पत्तिमुक्त्वास्त्रियामुत्पत्तिमाह । पुमानित्यादिना । पूर्णत्वेनहेतुनापुमान्नामावासुदेवोयोषितायांयोषिति । हलंताद्वेतिटाप् । रमायांरेतःसिंचति । प्रलयेस्वोदरेनिवेशितंजगद्रेतोवद्रमायांनिदधातीत्यर्थः । ततोबह्वीःबह्व्यःप्रजाः । पुरुषात्पूर्णगुणाद्वासुदेवात् संप्रसूताः ॥ ५ ॥ नकेवलंप्रजाःअन्यदपीत्याह । तस्मादिति । पुरुषादित्यर्थः । ऋचइत्यादौसंप्रसूतपदानुषंगोयथायोगंध्येयः । तत्रप्रसवोभिव्यक्तिः । यज्ञाअग्निहोत्रादयःसर्वेक्रतवःसोमयागाःपशुसंबद्धाः । अत्रऋगादिशब्दैस्तदभिमानिनश्चग्राह्याः । यज

मानःयज्ञक्रतूनामनुष्ठातासंप्रसूतइत्यर्थः। लोकाइत्युक्तं। तेकेलोकाइत्यतआह। सोमश्चंद्रोयत्रपवतेचरति। सूर्योयत्रपवतेतेलो
काइत्यर्थः ॥ ६ ॥ तस्मात्पुरुषात्। योषिद्द्वारादेवाबहुधासंप्रसूताःतथासाध्यादयोपिसंप्रसूताः वयांसिपक्षिणः। तपश्चकृच्छ्र
चांद्रायणादि। श्रद्धाआस्तिक्यबुद्धिः। सत्यंयथार्थवचनं। संप्रसूतपदस्ययथायोगमनुषंगस्सर्वत्रज्ञेयः ॥ ७ ॥ सप्तप्राणाः।
घ्राणरसनचक्षुःश्रोत्रत्वङ्मनोबुद्धिरूपाणिसप्तेंद्रियाणिप्रभवंति। तस्मात्पुरुषाद्योषिद्द्वारेतिभावः। तेनैतस्माज्जायतेप्राणोमन
इत्यादिनापूर्वत्रेंद्रियाणांसृष्टश्युक्तावपिइहयोषिद्द्वारकसृष्टयुक्तेर्नपुनरुक्तिरितिज्ञेयं। सप्तार्चिषस्सप्तेंद्रियवृत्तयःसमिधःगंधादि

तस्माच्चदेवाबहुधासंप्रसूताःसाध्यामनुष्याःपशवोवयांसि। प्राणापानौव्रीहियवौतपश्चश्रद्धास
त्यंब्रह्मचर्यंविधिश्च ॥७॥ सप्तप्राणाःप्रभवंतितस्मात्सप्तार्चिषःसमिधःसप्तहोमाः। सप्तइमेलो
कायेषुचरंतिप्राणागुहाशयांनिहिताःसप्तसप्त ॥ ८ ॥ अतःसमुद्रागिरयश्चसर्वेअस्मात्स्यंदंते
सिंधवःसर्वरूपाः। अतश्चसर्वाओषधयोरसाश्चयेनैषभूतैस्तिष्ठतेह्यंतरात्मा ॥ ९ ॥ ३ ॥

विषयाः। होमाइंद्रियाणांविषयैःसंबंधास्सप्तेत्यर्थः। इमेलोकाःसप्त तेकेलोकाइत्यतआह। येषुस्थित्वाप्राणास्सप्तचरंतिविष
यैस्सहसंबद्धाभवंतीत्यर्थः। इंद्रियगोलकाइतियावत्। किमर्थसृष्टाःप्राणाइत्यतआह। गुहाशयांगुहाशयायां। गुहा हृदय
माशयःस्थानंयस्यास्तस्यांबुद्धौ। निमित्तसप्तमी। प्राणिनांज्ञानोत्पत्त्यर्थंप्रतिशरीरंसप्तसप्तप्राणानिहिताःसंतोयेषुचरंतितेलो
काइत्यन्वयः। तथाचसूत्रं। सप्तगतेर्विशेषितत्वाच्चेति ॥ ८॥ अतोस्मात्पुरुषात्प्रभवंतीत्यनुषंगः। सर्वरूपाःसर्वदिङ्मुखाः।

सिंधवोनद्यः । अस्मात्पुरुषात्स्यंदंतेप्रवहंति । रसाश्चप्रभवंतीतियोज्ययेनपुरुषेणयोषिद्वारासृष्टैर्भूतैस्सहांतरात्माअंतर्यामिरूपी तिष्ठतेतिष्ठतिसपुमानेतत्सर्वंससर्जेत्यर्थः ॥ ९ ॥ इतितृतीयखंडः ॥ ३ ॥ तपसाज्ञानेनचीयतेसंबध्यतइत्यत्रब्रह्मणोज्ञानस्यचभेदः प्रतीयते । अक्षरात्संभवतीहविश्वमित्यनेनोक्तसृष्टिक्रिययातदाक्षिप्तबलादिनाचलोकइवभेदःप्रतीयते । तांभेदप्रतीतिंनिवारय न्भगवदभेदंज्ञानादेराह । पुरुषएवेदमित्यादिना । कर्मसृष्टिक्रिया । तपोज्ञानं । उपलक्षणमेतत्द्युतिबलादेर्धर्मजातस्य । त

पुरुषएवेदंविश्वंकर्मतपोब्रह्मपरामृतं । एतद्योवेदनिहितंगुहायांसोविद्याग्रंथिंविकिरतिहसो
म्य ॥ १ ॥ आविःसन्निहितंगुहाचरंनाममहत्पदं । अत्रैतत्सर्वमर्पितमेजत्प्राणन्निमिषच्चयत् ।
एतज्जानथसदसद्वरेण्यंपरंविज्ञानाद्यद्वरिष्ठंप्रजानां । यदर्चिमद्यदणुभ्योणुचयस्मिँल्लोकानिहि
तालोकिनश्च । तदेतदक्षरंब्रह्मसप्राणस्तदुवाङ्मनः । तदेतत्सत्यं ॥ २ ॥

थाचकर्मतपःप्रभृतीदंविश्वंसर्वंधर्मजातंपरामृतंपरामृताख्योब्रह्मशब्दितःपुरुषएवभगवानेव । नतुधर्मधर्मिणोर्भेदोभगवतिसंत व्यइति । तदाहसूत्रं । प्रतिषेधाच्चेति । एकमेवाद्वितीयंनेहनानास्तिकिंचनेतिभेदस्यनिषेधादित्यर्थः । एतज्ज्ञानिनःफलमाह । एतद्योवेदेति । एतत्स्रष्टृत्वादिगुणैस्सविशेषाभिन्नतयाविशिष्टंसर्वप्राणिहृदयगुहायांनिहितंब्रह्म योधिकारीवेद सोविद्याग्रंथिं प्रकृतिबंधंविकिरतिकॄविक्षेपेविक्षिपतिनिरस्यति । मुक्तोभवतीत्यर्थः । सोम्यसोमपानार्हेतिशौनकसंबोधनं । हेतिहर्षे ॥ १ ॥
पुनर्भगवतोमहिमांतरमुपदिष्टवानंगिराःशौनकंप्रतीत्याहवेदपुरुषः । आविरित्यादिना । आविर्नित्याभिव्यक्तस्वरूपं । व्याप्त

त्वात्सर्वसन्निहितं गुहाचरंहृदयगुहायांचरतीतिगुहाचरं । पद्यतेप्राप्यतइतिपदं । महदुत्तमंप्राप्यं नामप्रसिद्धंउक्तगुणत्वेनप्रसि द्धमित्यर्थः । अत्रआविरादिगुणयुक्तेभगवतिएतत्सर्वंअर्पितमाश्रितं । तत्सर्वंकिमित्यतआह । एजदिति । एजृकंपने । सामा न्यचेष्टोपेतंप्राणद्विशेषचेष्टायुक्तं निमिषत्चक्षुषीनिमील्यस्थितं जाग्रत्स्वप्नसुषुप्त्याद्यवस्थोपेतंयदेतज्जगज्जानथ । जानासित त्सर्वमत्रार्पितमित्यर्थः । पुनःकिंरूपंब्रह्मेत्यतआह । सदसदिति । तदक्षरंसदसद्भ्यांमूर्तामूर्ताभ्यांकार्यकारणाभ्यांवावरेण्यंश्रेष्ठं (वृञएण्यप्रत्ययः)विज्ञानाच्चतुर्मुखात्परमुत्तमं । विज्ञानशक्तिरहमासमनंतशक्तेरित्यादेः । यत्प्रजानांवरिष्ठंश्रेष्ठं । यदर्चिमदर्चि

तदमृतंतद्वेद्धव्यंसोम्यविद्धि । धनुर्गृहीत्वौपनिषदंमहास्त्रंशरंह्युपासानिशितंसंदधीत । आयम्य
तद्भावगतेनचेतसालक्ष्यंतदेवाक्षरंसोम्यविद्धि ॥ ३ ॥

ष्मत् । यच्चाणुभ्योणुचयस्मिन्लोकालोकिनोलोकस्थाजनालोकाभिमानिनोवानिहिताः । तदेतदुक्तगुणविशिष्टमक्षरंब्रह्मेत्यर्थः । महिमांतरमाह । सप्राणइति । प्राणइतिविधेयापेक्षयासइतिपुल्लिंगनिर्देशः । प्रकर्षेणअनितिचेष्टतेजगत्प्रेरयतीतिप्राणः । तदक्षरं वक्तिसमस्तवेदानि(द्यमि)त्येववाक् नतुप्रसिद्धवागाद्यभेदादित्येवकारार्थउशब्दः । तदक्षरंमनुतेसर्वमितिमनः । तदेतदक्षरंसत्यंअपराधीनस्वरूपं । षद्लृविशरणइतिधातोःसतःशरीरतोविशरणशीलान् जीवान्यमयतिनियमयतीतिवासत्यं ॥ २ ॥ तदमृतंदेहतोपिनाशरहितं । हेसोम्य औपनिषदंउपनिषत्संबंधि । प्रणवाख्यंधनुर्गृहीत्वावेद्धव्यंवेधनीयंतद्ब्रह्म

विद्धिजानीहि । यथावेध्यंलक्ष्यंवस्तुधानुष्काधनुर्गृहीत्वाशरेणविध्यंति । तथात्वमपिउपनिषदर्थभूतप्रणवार्थपर्यालोचन यामनसाब्रह्मसावधानंजानीहीत्यर्थः । वेद्धव्यंविद्धीत्युक्तमेवव्यनक्ति । महास्त्रमित्यादिना । उपासानिशितं । उपास यातीक्ष्णीकृतंशरंशरवत्स्थितंमनःत्वंसंदधीतसंधत्स्वव्यत्ययात्संयोजयेतियावत् । संधानमेवव्यक्तमाह । आयम्येति । तच्चेतःसमस्तवस्तुभ्योनियम्यनिवर्त्येतियावत् । तद्भावगतेनतदेकसंबद्धेनचेतसालक्ष्यंलक्ष्यभूतंतदेवाक्षरंहेसोम्यविद्धीत्यर्थः ॥ ३ ॥ किंधनुरादीत्यतोविविच्यदर्शयति । प्रणवोधनुः आत्माचेतःशरः । तदक्षराख्यंब्रह्मेत्यर्थः । वेद्धव्यंबोद्धव्यमित्य

प्रणवोधनुःशरोह्यात्माब्रह्मतल्लक्ष्यमुच्यते । अप्रमत्तेनवेद्धव्यंशरवत्तन्मयोभवेत् ॥ ४ ॥ यस्मि न्द्यौःपृथिवीचांतरिक्षमोतंमनःसहप्राणैश्चसर्वैः । तमेवैकंजानथआत्मानमन्यावाचोविमुंचथा ऽमृतस्यैषसेतुः ॥ ५ ॥

र्थः ॥ शरवदितिशरोयथावेद्धव्यमनुप्रविशतितथाज्ञान्यपितन्मयःतत्प्रविष्टोभवतीत्यर्थः ॥ ४ ॥ यथाक्षरंप्राधान्येनज्ञे यं तथान्यदप्यस्तिकिंतादृशमित्यतःतन्महिमोक्तिपूर्वकंनेत्याह । यस्मिन्द्यौरित्यादिना । यस्मिन्द्यौरोता पृथिवीचोता अं तरिक्षंचोतं सर्वैःप्राणैश्चक्षुरादींद्रियैःसहमनश्चयस्मिन्नोतं । वेञ्तंतुसंताने । पटेतंतवइवसंश्लिष्टतयायमाश्रित्यवर्ततेद्यौ रादिकं तंसर्वाधारमेवैकंआत्मानंजानथजानीत । व्यत्ययात् । शौनकोपलक्षितान्प्रत्युच्यतइतिबहुवचनं ॥ जानथआत्मा ॥ १० ॥

नमितिपृथङ्निर्देशस्सर्ववैलक्षिण्यज्ञापनार्थः । तदाहसूत्रे । द्युभ्वाद्यायतनंस्वशब्दादिति । एतेनाधेयज्ञानंविनातदाधा
रत्वेनज्ञानायोगात् । अवस्थितेरितिकाशकृत्स्नइतिसूत्रोक्तदिशाऽऽधेयकर्मदेवतादिजगज्ज्ञानंसर्वाधारत्वप्रकारकब्रह्मज्ञानो
पयोगिसत्परविद्याभवतीतिसूचितंभवति । अतएवप्राक्कर्मदेवतादिजगदुक्तिः । अत्रैतत्सर्वमर्पितमितिचोक्तं । अन्याः
अन्यविषयाःवाचःविमुंचथपरित्यजतप्राधान्येनेतिभावः । तदाहसूत्रे । हेयत्वावचनाच्चेति । कुतस्तस्यैवज्ञानमापाद्यमित्यत
आहअमृतस्यैषसेतुरिति । एषआत्माऽमृतस्यमुक्तवर्गस्यसेतुराश्रयः ॥ ५ ॥ यत्रदेहस्थेहृदौरथनाभौरथचक्रेअराइवनाड्यः

अराइवरथनाभौसंहतायत्रनाड्यः । सएषोंतश्चरतेबहुधाजायमानः ॥ ६ ॥ ओमित्येवध्यायत
आत्मानंस्वस्तिवःपारायतमसःपरस्तात् ॥ ७ ॥ यःसर्वज्ञःसर्वविद्यस्यैषमहिमाभुवि । दिव्येब्र
ह्मपुरेह्येषव्योम्न्यात्मासंप्रतिष्ठितः ॥ ८ ॥

संहतास्संबद्धाःसएषआत्माबहुधाविश्वादिरूपेणजायमानःप्रादुर्भवन्अंतःशरीरांतश्चरतेसंचरति ॥ ६ ॥ जानथेत्युक्तज्ञानो
पायमाह । ओमित्येवेति । आत्मानंओम्अशेषगुणपूर्णं । मुख्यवृत्त्याऋगादिशास्त्रवेद्यमित्येवध्यायत । किमर्थं तमसःपरस्तात्प
राय ज्ञानोपलक्षणं । जडप्रकृतिपरश्रीतत्वात्परभूतपरमात्मज्ञानाय । एवंध्यानेसतितज्ज्ञानंभवति । तेनचपरात्परज्ञानेनवोयु
ष्माकंस्वस्तिमंगलंभवतीत्यर्थः ॥ ७ ॥ आत्मानंविशिनष्टि । यस्सर्वज्ञःसर्वविदिति । एषसार्वज्ञादिरूपोयस्यमहिमाभुविभूम्या

दौप्रकटितःतमात्मानमित्यर्थः । कुत्रत्यआत्माध्येयइत्यतआह । दिव्यइति । ब्रह्मपुरेदेहे दिविभवेदिव्ये । व्योम्नोद्युसंबंधित्वा
द्दिव्यइत्युक्तिः । व्योम्निदेहस्थाकाशेएषआत्माप्रतिष्ठितः ॥ ८ ॥ शरीराकाशेपिहृदयरूपस्थलविशेषमाह । मनोमयइति । ज्ञा
नप्रचुरःपूर्णज्ञानइत्यर्थः । प्राणशरीरनेता प्राणानांपंचवायूनांसर्वेंद्रियाणांचशरीरस्यचनेताप्रेरकः । एतेनदेहेतस्यस्थितौकृत्यं
दर्शितं । प्राणादिनेतृत्वंचाज्ञस्यनयुक्तमित्यतोमनोमयइत्युक्तिः । अन्नेअन्नविकारेदेहे । कार्यकारणयोरभेदोपचारात् । हृदयं
सन्निधायअधिष्ठाय प्रतिष्ठितःस्थितः । तस्यदर्शनायोग्यत्वेध्यानंव्यर्थमित्यतआह । तद्विज्ञानेनेति । यदानंदरूपममृतंविभा

**मनोमयःप्राणशरीरनेताप्रतिष्ठितोन्नेहृदयंसन्निधाय। तद्विज्ञानेनपरिपश्यंतिधीराआनंदरूपममृ
तंयद्विभाति ॥९॥ भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः । क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे॥१०॥**

ति । अतोनंत्येनतथाहिलिंगमितिसूत्रोक्तदिशाऽव्यक्तैकस्वभावमप्यचिंत्याद्भुतशक्त्याविशेषेणभातिआविर्भवति तद्रूपंधीराः
पटुतरश्रवणमननिदिध्यासनवासनावासितांतःकरणजन्येनविज्ञानेनपरिपश्यंतिविषयीकुर्वंतीत्यर्थः । तथाचसूत्रं । प्रकाश
श्चकर्मण्यभ्यासादिति ॥ ९ ॥ तद्दृष्टेःफलमाह । भिद्यतइति । पराअपिब्रह्मादयोऽवरायस्मात्सपरावरःतस्मिन्परावरेतस्मिन्स
र्वोत्तमेतस्मिन्नानंदरूपेहरौदृष्टेसतिहृदयग्रंथिःअविद्यातन्मूलरागद्वेषदुःखादिरूपोबंधोभिद्यते । अपयाति अज्ञानमूलास्संदेह
विपर्ययाश्चापगच्छंति । अस्यापरोक्षज्ञानिनःकर्माणिसंचितागामीन्यप्रारब्धानिकर्माणिक्षीयंते । संचितानांक्षयोनाशःआगा

मिनामश्लेषः । तथाचसूत्रं । तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशाविति ॥ १० ॥ एवंदेहेभगवदुपासनास्थलमुक्त्वाब्रह्मां
डमध्यस्थसूर्यरूपंचोपास्तिस्थलमाह । हिरण्मयइति । हिरण्मयेसुवर्णात्मके परेउत्तमे कोशेब्रह्मांडे विरजंविरजस्कं रजोगु
णोपलक्षितसत्वादिगुणहीनं निष्कलंषोडशकलारहितं अतएवशुभ्रंशुद्धं ज्योतिषांतेजोरूपाणांज्योतिःप्रकाशकत्वप्रदं । सर्व
ज्योतिरपेक्षयातिशयितमहाप्रकाशरूपमितिवार्थः । पवित्राणांपवित्रंयोमंगलानांचमंगलमित्यादिवत् । आदित्यस्थंब्रह्मआ
त्मविदोविदुःजानंति । अतस्तत्रात्मानंध्यायीतेतिभावः ॥ ११ ॥ कथंसर्वज्योतिरपेक्षयातिशयितमहाप्रकाशरूपत्वंहरेरित्यत

**हिरण्मयेपरेकोशेविरजंब्रह्मनिष्कलं । तच्छुभ्रंज्योतिषांज्योतिस्तद्यदात्मविदोविदुः ॥ ११ ॥
नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः । तमेवभांतमनुभातिसर्वंतस्यभा
सासर्वमिदंविभाति ॥ १२ ॥**

आह । नतत्रेति । तत्रज्योतिषांज्योतीरूपेहरौ विषयसप्तमी । चंद्रतारकमितिद्वंद्वैकवद्भावः । तत्रभगवद्विषये सूर्यचंद्रादि
कंनभाति । तदपेक्षयाल्पप्रकाशरूपत्वात्सूर्यादेः महाप्रकाशंभगवंतं दीपःसौरालोकमिवनभासयंतिसूर्यादयस्तमितिभावः ।
तथाचगीता नतद्भासयतेसूर्यइत्यादि । नकेवलंसूर्यादेस्तदप्रकाशकत्वं । किंतुयत्प्रकाशमानत्वंस्वस्यास्तितदपिज्योतीरूपभग
वदधीनमित्याह । तमेवेति । भांतंप्रकाशमानंतंभगवंतं(अनुअनुसृत्यसर्वंसूर्य)अनु । अनुर्लक्षणे । तदधीनंसत्पूर्वमंत्रेप्रकृतंसू

र्येचंद्रादिकंभातिप्रकाशते । विश्वप्रकाशकत्वमपिसूर्यादेःतत्तेजोधिष्ठानत्वेनैवेत्याह । तस्येति । तस्यभासाभगवद्भासासर्वज
गद्भातिप्रकाशते । सूर्यादिप्रकाशद्वारेतिभावः । तथाचगीता । यदादित्यगतंतेजोजगद्भासयतेखिलं । यच्चंद्रमसियच्चाग्नौत
त्तेजोविद्धिमामकमिति मामकंमदधीनंमदीयंचेत्यर्थः ॥ १२ ॥ हृदयंसन्निधायप्रतिष्ठितइतिहृदये ज्योतिषांज्योतिरिति सू
र्येच ध्यानार्थेस्थित्युक्त्याप्राप्तपरिच्छिन्नत्वशंकांनिराह । ब्रह्मैवेदमिति । इदममृतंब्रह्मैव । पुरस्तात्पुरोदेशे प्रसृतंव्याप्तंब्रह्म
पश्चात्पश्चिमदेशेब्रह्म दक्षिणतश्चोत्तरेणदक्षिणदेशेउत्तरदेशेचप्रसृतमधश्चोर्ध्वंचाधोदेशोत्तरदेशयोःप्रसृतमिदंब्रह्मैवविश्वंपूर्णंइ

ब्रह्मैवेदममृतंपुरस्ताद्ब्रह्मपश्चाद्ब्रह्मदक्षिणतश्चोत्तरेण । अधश्चोर्ध्वंचप्रसृतंब्रह्मैवेदंविश्वमिदंवरिष्ठं
॥ १३ ॥ ४ ॥ द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते । तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्न
न्योअभिचाकशीति ॥ १ ॥

दंब्रह्मैववरिष्ठंसर्वोत्तमं । एवंसर्वदेशेषुव्याप्तस्यापिहरेःहृदयाद्यल्पदेशेष्ववस्थानंनिचाय्यत्वादेवंव्योमवच्चेतिसूत्रोक्तदिशायुक्त
मितिध्येयं ॥ १३ ॥ इतिचतुर्थःखंडः ॥ ४ ॥ सएषोंतश्चरतेबहुधाजायमानइत्युक्तंहरेर्बहुधाजायमानत्वंजीवाभेदेनेतिभ्रम
निरासायतयोर्भेदमाह । द्वासुपर्णेति । सयुजौसंयुक्तौ । सदावियोगरहितौ । उपकार्योपकर्तृभावेनसखायौद्वौ सुपर्णरूपौ । ॥ १२ ॥
जीवेशौ समानंवृक्षंदेहाख्यमेकमश्वत्थवृक्षंपरिषस्वजाते । आलिलिंगतुः । तयोस्सुपर्णयोर्मध्येऽन्योजीवःपिप्पलमश्वत्थफल

रूपंदेहजनितंकर्मफलमस्वाद्वेवस्वादुवदत्ति । अन्यईश्वरोऽनश्नन्जीवाद्यंकर्मफलमनश्नन्नभि(तः)चाकशीति । काश्रृदीप्तौय ङ्लुगंतं । प्रकाशते । स्वस्थित्यैनतदपेक्षतइतिभावः । तदुक्तमेकादशस्कंधे । एकस्तयोःखादतिपिप्पलान्नमन्योनिरन्नोपिबलेन भूयानिति ॥ १ ॥ अस्यबंधमोक्षहेतूक्रमेणाह । समानइति । जुष्टमितिच । समानेएकस्मिन्देहाख्येपिप्पलवृक्षे निमग्नोनिरू ढोममताद्यभिमानवान् पुरुषोजीवोऽनीशयानविद्यतेन्यईशोयस्याःसाऽनीशास्वतंत्राभगवन्मतिःतयामुह्य(तिभ)मानःशोच

समानेवृक्षेपुरुषोनिमग्नोअनीशयाशोचतिमुह्यमानः । जुष्टंयदापश्यत्यन्यमीशमस्यमहिमानमि तिवीतशोकः ॥ २ ॥ यदापश्यःपश्यतेरुग्मवर्णंकर्तारमीशंपुरुषंब्रह्मयोनिं । तदाविद्वान्पुण्यपापे विधूयनिरंजनःपरमंसाम्यमुपैति ॥ ३ ॥

ति । भगवंतमज्ज्ञात्वासांसारिकक्लेशमनुभवति । जुष्टंजुषीप्रीतिसेवनयोः सर्वसेव्यमीशंविष्णुंजीवादन्यं । इति तदेतत्सत्य मित्यादिनोक्तप्रकारेणाखिलकर्माराध्यत्वजगत्स्रष्टृत्वादिरूपमस्येशस्य महिमानंचयदापश्यतिपुरुषोजीवः । तदावीतशोको पगतक्लेशःमुक्तोभवतीत्यर्थः ॥ २ ॥ प्रतिबंधककर्मणोभावात् । कथंतद्दृष्ट्यामुक्तिरशरीरस्यद्द्ष्टिर्वाकथमित्यतःपूर्वमंत्रार्थमेव विशदमाह । यदापश्यइति । पश्यतीतिपश्योद्रष्टाजीवो यदारुग्मवर्णंहेमवर्णविग्रहं । रूपोपन्यासाच्चेतिसूत्रात् । ब्रह्मयोनिं हिरण्यगर्भस्यकारणं जगत्कर्तारंपश्यतेपश्यति । तदासौविद्वान्ज्ञानी अनिष्टंपुण्यंपापंचविहायनिरंजनःनिर्लेपः । उत्तरपूर्वा

घयोरश्लेषविनाशावितिसूत्रोक्तेः । अंजनाख्याविद्याहीनइतिसुधोक्तेः । परमंसाम्यंनिर्दुःखपूर्णानंदत्वादिब्रह्मसाम्यमाप्नोती
त्यर्थः । पुंस्त्वादिवत्त्वस्येतिसूत्रोक्तदिशाप्रागपिसाम्यसत्वेप्यप्राप्तभोगप्राप्त्यभिप्रायेणपरममित्युक्तिः । अभिव्यक्त्यपेक्षयावा
॥ ३ ॥ विद्वानितिप्रकृतजीवन्मुक्तस्यस्थितिप्रकारमाह । प्राणोह्येषइति । विद्वानतिवादीनभवतेनभवति । कुतःसर्वभूतैः
सर्वेंद्रियादिभिरेषप्राणएवप्रकृष्टचेष्टकोहरिरेव विभातिस्वतंत्रोवर्तते । अहंत्वस्वतंत्रइतिविजानन्ह्रियतोवर्ततेअतइतियोज
ना । अतिवादीनचेत्कथंतर्ह्यास्तइत्यतआह । आत्मक्रीडइति । आत्मनाभगवताक्रीडतइत्यात्मक्रीडः । आत्मदर्शनजंसुखं

**प्राणोह्येषसर्वभूतैर्विभातिविजानन्विद्वान्भवतेनातिवादी । आत्मक्रीडआत्मरतिःक्रियावाने
षब्रह्मविदांवरिष्ठः ॥ ४॥ सत्येनलभ्यस्तपसाह्येषआत्मासम्यग्ज्ञानेनब्रह्मचर्येणनित्यं । अंतःशरी
रेज्योतिर्मयोहिशुभ्रोयंपश्यंतियतयःक्षीणदोषाः ॥ ५ ॥**

प्राप्तइत्यात्मरतिः । भगवदाराधनैकक्रियावान् । ब्रह्मविदामेषवरिष्ठःश्रेष्ठः ॥४॥ भगवदपरोक्षज्ञानायध्यानरूपंसाधनमुक्तंध्या
यतआत्मानमित्यत्र तत्सहकारीण्याह । सत्येनेनि । यथार्थवचनेन तपसावर्णाश्रमोचितधर्मानुष्ठानपूर्वंनित्यंभगवदनुचिं
तनेनसम्यग्ज्ञानेनगुरूपदेशजन्यतत्वविषयकसम्यग्ज्ञानेन नित्यंसर्वेंद्रियनियमनरूपब्रह्मचर्येणांतःशरीरेशरीरांतः ज्योतिर्मयः ॥ १३ ॥
प्रचुरप्रकाशः । शुभ्रःशुद्धःजडामिश्रः एषआत्मालभ्योपरोक्षविषयो परोक्षद्वाराप्राप्यइतिवार्थः । क्षीणदोषायतयःप्रयत्नशी

लाःयंपश्यंतिएषआत्मेत्यन्वयः ॥ ५॥ हरिभक्तस्यैवभगवत्प्राप्तिर्नतद्विमुखस्येत्याह । सत्यमेवेति । सद्गुणत्वहेतुनासत्यमितिहरि
रुच्यते । तन्निष्ठभक्त्यतिशयेनतस्मिन्नेवमग्नत्वहेतुनासत्यभक्तोपिसत्यपदेनात्रगृह्यते । तथाचसत्यंसत्याख्यभगवन्निष्ठायुक्तंअ
धिकारिजीवजातमेवजयतिप्राप्नोति आत्मानमितिविपरिणामेनान्वयः । नानृतंऋताख्यहरिविरुद्धत्वहेतुनाअनृतपदाभिधेयम
सुरजातंनजयत्यात्मानमित्यर्थः । कुतएवंसत्यनिष्ठएवतमाप्नोतिनान्यइत्यतस्तत्प्राप्तिमार्गस्यतदधीनत्वादित्याह । सत्येनेति । यो
जनातुयत्रलोकेसत्यस्यसद्गुणस्यहरेःपरमंतन्निधानंप्रत्यक्षतयासन्निधानं तंवैकुंठलोकं येनपथामार्गेणाप्तकामाऋषयोज्ञानिनःआ

**सत्यमेवजयतिनानृतंसत्येनपंथावितततोदेवयानः । येनाक्रमंत्यृषयोह्याप्तकामायत्रतत्सत्यस्यपरमं
निधानं ॥ ६ ॥ बृहच्चतद्दिव्यमचिंत्यरूपंसूक्ष्माच्चतत्सूक्ष्मतरंविभाति । दूरात्सुदूरेतदिहांतिके
चपश्यत्स्विहैवनिहितंगुहायां ॥ ७ ॥**

क्रमंतिगच्छंति अयंदेवयानाख्यःपंथाःसत्येनहरिणाविततोविस्तृतस्तदधीनइतियावत् ॥६॥ सत्यस्यमहिमानमाह । बृहच्चतदित्या
दिना । तत्सत्याख्यंवस्तु देशकालगुणैःबृहत्बृंहितं विशेषणसमुच्चयेचशब्दः । दिव्यमद्भुतं अतएवाचिंत्यरूपं सूक्ष्मात्प्रकृत्यादेः
तत्सत्यंसूक्ष्मतरंचात्यंतमप्रतिघं अणोरणुतरंचेतिवार्थः । विभाति विशेषेणप्रकाशमानमास्ते । भादीप्ताविितिधातोः । तत्सत्याख्यं
ब्रह्मदूरात्सुदूरे इहांतिकेच सर्वगत्वादितिभावः । पश्यत्सुपश्यतांज्ञानिनां इहैवशरीरेहृदयगुहायां निहितंसंस्थितं ॥ ७ ॥

एवंविधस्यभगवतोज्ञानं चक्षुरादिदेवतोपासनाबलात् भवतिकिमित्यतो नेत्याह । नचक्षुषेति । चक्षुरधिष्ठातृदेवताप्रसादे ननगृह्यते । गुहाशयांनिहितंवस्त्वित्यनुषंगः । वाचावाग्देवताप्रसादेनेत्यर्थः । अन्यैरिंद्रियांतरदेवै स्तपसानशनादिव्रतेन कर्मणावर्णाश्रमोचितधर्मेणवा नगृह्यते । केनतर्हीत्यतआह । ज्ञानेति । ज्ञानरूपस्यवायोश्चतुर्मुखस्यवाप्रसादेन । विज्ञानशक्तिरहमासमनंतशक्तेरित्युक्तेः । सत्यंज्ञानमनंतमित्यादेर्ज्ञानस्वरूपस्यहरेःप्रसादेनेतिवार्थः । अतोनंतेनतथाहिलिंगमितिसूत्रात् । वाय्वादिस्त्वनुज्ञाप्रदइतिध्येयं । विशुद्धसत्वः । रजस्तमोभ्याममिश्रितोद्रिक्तसत्वगुणोभवति । ततस्तु विशुद्धसत्वत्वादेवनिष्कलं

नचक्षुषागृह्यतेनापिवाचानान्यैर्देवैस्तपसाकर्मणावा । ज्ञानप्रसादेनविशुद्धसत्त्वस्ततस्तुतंपश्यते
निष्कलंध्यायमानः ॥८॥ एषोणुरात्माचेतसावेदितव्योयस्मिन्प्राणःपंचधासंविवेश । प्राणैश्चित्तं
सर्वमोतंप्रजानांयस्मिन्विशुद्धेविभवत्येषआत्मा ॥९॥ यंयंलोकंमनसासंविभातिविशुद्धसत्त्वः
कामयतेयांश्चकामान् । तंतंलोकंजयतेतांश्चकामांस्तस्मादात्मज्ञंह्यर्चयेद्भूतिकामः ॥ १० ॥ ५ ॥

षोडशकलात्मकदेहहीनं ध्यायमानोनिरंतरचिंतांकुर्वन् भगवंतंपश्यतेपश्यति ॥ ८ ॥ केनेंद्रियेणेत्यतआह । एषोणुरिति । एषोऽणुरूपेणसर्वप्राणिषुस्थितआत्मा चेतसावेदितव्योज्ञातव्यः । एषइत्युक्तःकइत्यतआह । यस्मिन्निति । प्रजानांसर्वंचित्तं प्राणैरिंद्रियैस्सहयस्मिन्प्राणेमुख्यवायावोतमाश्रितं । सप्राणो यस्मिन्विशुद्धेनिष्कलेहरौ पंचधाप्राणापानादिपंचरूपात्मनाविवेशआश्रितस्तिष्ठति । विभवतिचविभवयुक्तश्चभवतिएषआत्मेतियोजना ॥ ९ ॥ आत्मवेदिनोमहिमानमाह ।

(वेदनस्तुत्यर्थं)यंयमिति । विशुद्धसत्वआत्मवेदी यंयंलोकंमनसासंविभातिभावयतिगच्छतीतियावत् । यांश्चकामान् काम्य मानान्विषयान्कामयतेइच्छति तंतंलोकंतांश्चकामान् जयतेप्राप्नोति ॥ तस्मादात्मज्ञानिनोमहत्वाद्भूतिकामोभाग्यकामः आत्मज्ञंभगवज्ज्ञानिनं अर्चयेत्पूजयेत् । अर्चपूजायां । हिशब्दःतदर्चनेनभूतिमान्भवतीतितिनिश्चयार्थः ॥ १० ॥ इ तिपंचमखंडः ॥ ५ ॥ आत्मज्ञार्चकस्यभूतिःकीदृशीत्यतोवायुज्ञानद्वारापरमपुमर्थहेतुब्रह्मज्ञानाप्तिरूपेत्याह । सवेदैतदि ति । योजनातुयत्रयस्मिन्मुख्यवायौ विश्वंपूर्णं शुभ्रंशुद्धं ब्रह्मनिहितंस्थितंसत् भाति । वाय्वाविष्टजीवस्यवायुद्वारा

सवेदैतत्परमंब्रह्मधामयत्रविश्वंनिहितंभातिशुभ्रं । उपासतेपुरुषंयेह्यकामास्तेशुक्रमेतदतिवर्तं तिधीराः ॥ १ ॥ कामान्यःकामयतेमन्यमानःसकामभिर्जायतेतत्रतत्र । पर्याप्तकामस्यकृतात्म नश्चइहैवसर्वेप्रविलीयंतिकामाः ॥ २ ॥

ज्ञानदीपनंकरोति एतत्परमंमुख्यं ब्रह्मधाम परब्रह्माधिष्ठानगृहंमुख्यवायुं सआत्मज्ञार्चकः वेदजानातीति । यस्त्वात्म ज्ञमर्चयतिसमुख्यवायुज्ञोभवति तज्ज्ञानेचसति तत्रस्थोहरिस्तद्वारातस्यात्मज्ञार्चकस्य विशेषतोभगवज्ज्ञानवृद्धिंकरोती तिभावः । कथमेतज्ज्ञानस्यभूतित्वं सुखप्राप्तिदुःखनिरासायोन्यतरत्वाभावादित्यतो ब्रह्मप्राप्तिहेतुत्वादित्याह । उपास तइति । येऽकामाःकामादिदोषहीनाः पुरुषंपूर्णषड्गुणं ब्रह्मोपासते । श्रवणमननध्यानैर्जानंति । तेशुक्रंशोकरहितमेतद्ब्रह्म गंतुमितिशेषः । अतिवर्तंति । संसारक्लेशमतिक्रम्यवर्ततेमुक्ताभवंतीत्यर्थः । हिशब्दःप्रसिद्धिद्योतकः ॥ १ ॥ अकामाइ

तिकिमर्थमित्यतस्सकामतयोपासनेक्षयिष्णुलोकप्राप्तिरेव ननित्यलोकावाप्तिरित्याह । कामानिति । यः कामान्विषयान्भद्रा न्मन्यमानः कामयतेइच्छति विषयकामनयाभगवंतमुपास्तइतियावत् । सपुमान्कामभिर्विषयैस्सहतत्रतत्रलोके भाग्य पुरुषसंततौवाजायते । अकामतातर्हिकिंथंभवतीत्यतआह । पर्याप्तेति । यथेष्टंविषयान्भुक्तवतोऽतएवकृतात्मनस्तृप्तमनस्क स्येहैवजन्मनि सर्वेकामाःकामनाः नानावस्तुविषयिण्यइच्छाःप्रविलीयंतिनिवृत्ताभवंतीति ॥ २ ॥ नचक्षुषागृह्यतइत्यत्रदे वतांतरशक्त्याहरिंनपश्यंति किंतुज्ञानप्रसादादित्युक्तंतद्विशदयति । नायमिति । मेधाप्रज्ञाविशेषः । अयमात्मा भक्तिही

नायमात्माप्रवचेननलभ्योनमेधयानबहुनाश्रुतेन । यमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्माविवृणुते तनूंस्वां ॥ ३ ॥ नायमात्माबलहीनेनलभ्योनचप्रमादात्तपसोवाप्यलिंगात् । एतैरुपायैर्यतते यस्तुविद्वांस्तस्यैषआत्माविशतेब्रह्मधाम ॥ ४ ॥

नप्रवचनादिनानलभ्यः नसाक्षात्कर्तुंशक्यः । अपितु यंभक्तमेषआत्मा वृणुतेस्वीकरोति । यस्मैप्रसीदतीतियावत् । तेनै वप्रसादविषयेणैवलभ्यस्तद्व्यनक्ति । तस्यस्वप्रसादविषयस्यैषप्रसन्नःआत्मा स्वांतनूं विवृणुतेप्रकाशयतीति तस्यैवापरोक्ष विषयोभवतीत्यर्थः ॥ ३ ॥ तर्हिप्रवचनादेर्वैयर्थ्यमित्यतआह । नायमिति । बलहीनेनश्रवणमननभक्त्यादिबलहीनेन प्रमादाद्भगवद्विस्मरणादिरूपात् । दृष्टांतार्थमेतदुक्तिः । अलिंगात्लिंगोपलक्षितप्रमाणानुक्तात्तपसोपीत्यर्थः । तर्हिकेन

लभ्यइत्यतआह । एतैरिति । भक्त्याद्युपेतश्रवणादिरूपैरुपायैः विद्वान्ज्ञानी यस्तुयततेसाक्षात्काराय तस्यैषआत्मा ब्रह्मधामप्रागुक्तदिशामुख्यवायुं विशतेप्रविशति । यस्त्वेतैरुपायैःविद्वान्भूत्वा पुनर्ब्रह्मज्ञानाययत्नवानास्ते तस्मिन्पुरुषेस्थित मुख्यवायौ विद्यमानएवभगवान्वायुद्वारा तस्यज्ञानदीपनंकरोतीति ज्ञानदीपनस्यागंतुकत्वेनहेतुना तदपेक्षयातस्यब्रह्मधाम वायुंविशतइत्युच्यते । यथापिशाचाविष्टपुरुषे तस्मिन्सदास्थितोपि मंत्रादिभिराविष्टःपिशाचइतिव्यवहारस्तथेतिभावः ॥४॥ आत्मज्ञानमहिमानमाह । संप्राप्यैनमिति । ज्ञानतृप्ताज्ज्ञानेनतृप्ताःऋषय एनंभगवंतंसंप्राप्य कृतात्मानःकृतकृत्या वीत

संप्राप्यैनमृषयोज्ञानतृप्ताःकृतात्मानोवीतरागाःप्रशांताः । तेसर्वगंसर्वतःप्राप्यधीरामुक्तात्मा नःसर्वमेवापियंति ॥ ५ ॥ वेदांतविज्ञानसुनिश्चितार्थाःसंन्यासयोगाद्यतयःशुद्धसत्त्वाः । ते ब्रह्मलोकेषुपरांतकालेपरामृतात्परिमुच्यंतिसर्वे ॥ ६ ॥

रागाप्रशांताः विषयोपरताभवंति । नकेवलमेतावदेव किंतुतेधीरास्सर्वतोदेहादिबंधान्मुक्तात्मानस्संतंसर्वगंभगवंतंप्राप्य सर्वमेवगुणपूर्णंभगवंतमेवापियंति । इतरैरज्ञेयतयाप्रविशंति प्रविश्यचेच्छयांतर्बहिस्संचरंतो भोगान्भुंजानाआसतइत्य र्थः ॥ ५ ॥ ज्ञानानंतरमेवमुक्ताभवंतिकिमित्यतोनेत्याह । वेदांतेति । वेदानामंतोनिर्णयोयस्मात्तस्मान्मीमांसाशास्त्राज्ज नितेनविज्ञानेनसुनिश्चितार्थाःसम्यङ्निर्णीतार्था भगवतिसर्वकर्मणांसमर्पणाख्यसंन्यासरूपयोगादुपायाच्छुद्धसत्वा यतयःप्रय

त्वशीलाःये । तेसर्वे ब्रह्मलोकेषुसत्यलोकेषु स्थित्वेतिशेषः । स्थानबाहुल्याद्बहुवचनं । परांतकालेपरेतिब्रह्मणःशतायुषोनाम । तस्यांतकाले परामृतात्प्रकृतिबंधात्परिमुच्यंतिपरिमुच्यंते मुक्ताभवंतीति । तदुक्तंसूत्रे । कार्यबादरिरस्यगत्युपपत्तेरिति । एतच्चप्रतीकेषुब्रह्मध्यातृपरं अप्रतीकालंबनायेव्याप्तदर्शिनस्तेतुवैकुंठादिलोकेऽमुक्तस्थानेस्थितंभगवंतमेवप्राप्य तत्रस्थित्वा परांतकालसमये पुनःसत्यलोकंप्राप्यतेनसहमुच्यंते । तदाहसूत्रे । परंजैमिनिर्मुख्यत्वादिति ॥ ६ ॥ मुक्तिप्रकारमाह । गताइति । प्रतिष्ठाःसंसारिणांप्रतिष्ठानियामकाः कलाःकलाभिमानिनः पंचदशदेवाः गतामुक्ताःयस्यजीवस्यसंसारे

गताःकलाःपंचदशप्रतिष्ठादेवाश्चसर्वेप्रतिदेवतासु । कर्माणिविज्ञानमयश्चआत्मापरेऽव्ययेसर्व एकीभवंति ॥ ७ ॥

नियामकतयास्थितास्ताःकलादेवतास्तज्जीवमुक्त्यवसरेमुक्ताःसत्योमुक्तस्यापितस्यनियामिकाइतितात्पर्यार्थः । पंचदशकलास्तु सप्राणमसृजतप्राणाच्छ्रद्धांखंवायुर्ज्योतिरापःपृथिवींद्रियंमनोन्नमन्नाद्वीर्यंतपोमंत्राःकर्मलोकालोकेषुनामचेतिषट्प्रश्नोक्तदिशाध्येयाः । तदभिमानिदेवताश्च कर्मेतिपुष्करःप्रोक्तःइत्यादिषट्प्रश्नभाष्योक्तदिशा प्राणवाणीविनायकप्राणसुतमरुत्पावकबुधशनींद्ररुद्रचंद्रवरुणवह्निस्वाहापर्जन्योषाःक्रमाज्ज्ञेयाः । उक्तंहि । यत्रमूर्तिंधराःकलाइत्येकादशस्कंधतात्पर्येसप्तदशाध्याये कलाःप्राणाद्याः । सप्राणमसृजतप्राणाच्छ्रद्धामित्यादि । यद्यपिकर्माभिमानिनापुष्करेणसहषोडशकलाः । तथापित

स्यकर्माणीतिपृथगुक्तेःपंचदशत्वं । पृथगुक्तिकृत्यंभाष्येव्यक्तं । सर्वेदेवाश्चकलादेवेभ्योन्येसर्वेदेवाश्च प्रतिदेवतासुदेवताप्रतिविं बभूतासुप्रजासु स्थितास्तिष्ठंतिकर्माणि । कर्माभिमानीपुष्करः विज्ञानमयोविज्ञानरूपआत्माजीवश्चअव्ययेनाशरहिते परेपर मात्मनि सर्वेषोडशकलादेवताःजीवाश्चेत्येतेसर्वेमुक्ताःसंतएकीभवंति परमात्मानंप्रविश्यतेनसहएकस्थानस्थिताभवंतीतिवा तद्बुद्धिविषयीकृतार्थविषयकबुद्धिमंतो नतुतद्विरुद्धार्थविषयकमतियुक्ताइतिवार्थः ॥ ७ ॥ एकीभावप्रकारमेवदृष्टांतेनाह । यथानद्यइति । स्यंदमानाःप्रस्रवमाणाः । समुद्रअयनंयासांताःसमुद्रायणाःनद्यःसमुद्रंप्राप्य नामरूपेस्वकीयंगंगागोदावर्यादि

यथानद्यःस्यंदमानाःसमुद्रायणाःसमुद्रंप्राप्यास्तंगच्छंतिन्नामरूपेविहाय । तथाविद्वान्नामरूपा द्विमुक्तःपरात्परंपुरुषमुपैतिदिव्यं ॥ ८ ॥ सयोहवैतत्परमंब्रह्मवेदब्रह्मैवभवति । नास्याब्रह्म वित्कुलेभवति । तरतिशोकंतरतिपाप्मानंगुहाग्रंथिभ्योविमुक्तोमृतोभवति ॥ ९ ॥

नामगंगादिरूपंचाविहायअत्यक्त्वा । मणीवेत्यादाविवाप्रगृह्यत्वं । यद्वासाधरणचेतनैरज्ञेयनामरूपत्वान्नामरूपेविहायेतिवा अस्तमदर्शनंगच्छंतियथा । तथाविद्वान्ब्रह्मज्ञानी नामरूपाद्विमुक्तोऽमुक्तःनामरूपयुक्तएव विप्रियमित्यत्रेववविशब्दोत्रनिषेधा र्थः । यद्वासंसारिभिरज्ञेयनामरूपत्वाद्विमुक्तोवियुक्तइवस्थितः परात्परंसर्वोत्तमं दिव्यमद्भुतंपुरुषंभगवंतं उपैतिप्राप्नोति ॥८॥ एतदुपनिषदर्थज्ञानिनःफलमाह। सयइति। योधिकारीएतत्परमंब्रह्मवेद सब्रह्मैवज्ञानानंदादिस्वोचितगुणैर्बृंहितएवभवतिनप

रब्रह्मतामाप्नोति । अस्यकुलेवंशे अब्रह्मवित्ब्रह्मानभिज्ञोनभवति तरतिशोकंतरतिपाप्मानं गुहाग्रंथिभ्यःहृदयस्थाविद्याकाम
कर्मादिबंधाद्विमुक्तोऽमृतोभवति ॥ ९ ॥ अस्याउपनिषदःकोधिकारीत्यतस्तंश्लोकोदाहरणेनाह । तदेषश्लोकइति । तत्रैत
द्विद्याधिकारविषये वक्ष्यमाणश्लोकोभवतीत्यर्थः । श्रोत्रियाःछंदोध्येतारः ब्रह्मनिष्ठाःब्रह्मणिभक्तिमंतः स्वयंजुह्वतःअग्निहो
त्रादिकमनुतिष्ठंतः एकऋषीन्प्रधानऋषीन् श्रद्धयंतःश्रद्धापूर्वकमर्चयंतः । यैस्तुशिरोव्रतंविधिवच्चीर्णं शिरोव्रतंनामव्रतवि
शेषः । तेषामेवैतांब्रह्मविद्यांब्रह्मज्ञप्तिहेतुभूतांउपनिषदं वदेतआविष्कारेणवदेत स्पष्टंउपदिशेदित्यर्थः । (भासनोपसंभाषा

तदेषश्लोकः । क्रियावंतःश्रोत्रियाब्रह्मनिष्ठाःस्वयंजुह्वतएकर्षींश्छ्रद्धयंतः। तेषामेवैतांब्रह्मविद्यांव
देतशिरोव्रतंविधिवद्यैस्तुचीर्णं ॥ १० ॥ तदेतत्सत्यमृषिरंगिराःपुरोवाच। नैतदचीर्णव्रतोधीते ॥
ॐनमःपरमऋषिभ्योनमःपरमऋषिभ्यः ॥ ६ ॥ इतिश्रीमदाथर्वणोपनिषत्समाप्ता ॥

ज्ञानयत्नविमत्युपमंत्रणेषुवदइतिभासनार्थेआत्मनेपदं) ॥ १० ॥ स्वोक्तंप्रमेयमृषिणाप्युक्तमित्याह । तदेतदिति । अंगिरा
ऋषिः एतन्मयोपदिष्टंप्रमेयं अचीर्णव्रतःपुमान् नाधीतेनावधारयेत् इतिपुरोवाच । तदेतदृषिणोक्तंसत्यंयथार्थमित्यर्थः ।
वेदपुरुषः उपनिषदं प्रागुक्तानेकऋषिप्रणामेनसमापयति नमइति । आदराद्विरुक्तिः । समस्तगुणपूर्णायदोषदूरायविष्णवे ।
नमःश्रीप्राणनाथायभक्ताभीष्टप्रदायिने॥ आथर्वणोपनिषदोभाष्याद्युक्तार्थसंग्रहः। राघवेंद्रेणयतिनाकृतोमाधवतुष्टये॥ इतिश्री
राघवेंद्रतीर्थपूज्यपादविरचितआथर्वणोपनिषत्खंडार्थःसंपूर्णः ॥ ॥ ॥ ॥ ॥

अयं ग्रंथः कुंभघोणस्थमध्वविलासपुस्तकालयाधिपतिभ्यां अपशंकररामाचार्य, टी. आर्.
कृष्णाचार्यनामभ्यां पंडितैः संशोध्य मुंबय्यां निर्णयसागरमुद्रणयंत्रे
मुद्रयित्वा प्रकाशितः। शाके १८१८

॥ आथर्वणोपनिषत्खंडार्थः संपूर्णः ॥